## तीषसहलुभरुषरिषः । (४८/२३४०)

तकारादावार्धधातुके इषु सह लुभ रुष रिष इत्येतेभ्यो[1] वा इडागमो भवति । इषु – एष्टा, एषिता । 'इषु इच्छायाम्' (धा. पा. १३५२) इत्यस्यायं विकल्प इष्यते । यस्तु 'इष गतौ' (धा. पा. ११२८) इति दैवादिकः, तस्य प्रेषिता, प्रेषितुम्, प्रेषितव्यम् इति नित्यं भवति । [2]योऽपि 'इष आभीक्ष्ण्ये' (धा. पा. १५२६) इति क्र्यादौ पठ्यते, तस्याप्येवमेव । तदर्थमेव 'तीषसह' इति सूत्रे केचित् उदितमिषं पठन्ति । सह – सोढा, सहिता । लुभ – लोब्धा, लोभिता । रुष – रोष्टा, रोषिता । रिष – रेष्टा, रेषिता । तीति किम् ? [3]एषिष्यति ॥

## सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् । (४९/२६१८)

इवन्तानां धातूनाम्, ऋधु भ्रस्ज दम्भु श्रि स्वृ यु ऊर्णु भर ज्ञपि सन् इत्येतेषां च सनि वा इडागमो भवति । इवन्तानाम्[4]–दिदेविषति, दुद्यूषति । सिसेविषति, सुस्यूषति । ऋधु–अर्दिधिषति, [5]ईर्त्सति । भ्रस्ज–बिभ्रज्जिषति, बिभ्रक्षति, बिभर्ज्जिषति, बिभर्क्षति । दम्भु – दिदम्भिषति, धिप्सति, धीप्सति । श्रि – उच्छिश्रयिषति, उच्छिश्रीषति । स्वृ – सिस्वरिषति, सुस्वूर्षति । यु – यियविषति, युयूषति । ऊर्णु – प्रोर्णुनविषति, प्रोर्णुनुविषति, प्रोर्णुनूषति । भर इति भृञ् इत्येतस्य भौवादिकस्य ग्रहणम्, शपा निर्देशात् । बिभरिषति, बुभूर्षति । ज्ञपि – जिज्ञपयिषति, ज्ञीप्सति । सन् – सिसनिषति, सिषासति ।

केचिदत्र 'भरज्ञपिसनितनिपतिदरिद्राणाम्' इति पठन्ति । तनि – तितनिषति, तितंसति, तितांसति । पति – पिपतिषति, पित्सति । दरिद्रा – दिदरिद्रिषति, दिदरिद्रासति । सनि इति किम् ? देविता । भ्रष्टा ॥

## क्लिशः क्त्वानिष्ठयोः । (५०/३०४९)

क्लिशः [6]क्त्वानिष्ठयोः वा इडागमो भवति । क्लिष्ट्वा, क्लिशित्वा । क्लिष्टः, क्लिशितः । क्लिष्टवान्, क्लिशितवान् । 'क्लिशू विबाधने' (धा. पा. १५२३) इत्यस्य क्त्वायां विकल्पः सिद्ध एव, निष्ठायां [7]तु 'यस्य विभाषा' (७.२.१५/३०२५) इति प्रतिषेधः प्राप्नोति । 'क्लिश उपतापे' (धा. पा. ११६२) इत्येतस्य तु क्त्वायां निष्ठायां च नित्यमिडागमः प्राप्नोति, तदर्थं क्त्वाग्रहणं क्रियते ॥

## पूङश्च । (५१/३०५०)

पूङश्च [8]क्त्वानिष्ठयोर्वा इडागमो [9]भवति । पूत्वा, पवित्वा । [10]सोमोऽतिपूतः, [11]सोमोऽतिपवितः । पूतवान्, पवितवान् । [12]'श्र्युकः किति' (७.२.११/२३८१) इति प्रतिषेधे प्राप्ते विकल्पो विधीयते ॥

---

1. धातुभ्यः इत्यधिकम् क. 2. यस्तु क. 3. एषिष्यते ब. क. ड. ई, एष्यति ह. 4. दिवु इत्यधिकम् ब. 5. इर्त्स्यति क. 6. उत्तरयोः इत्यधिकम् क, धातोः इत्यधिकम् ब. ई. 7. तु नास्ति क. 8. धातोः इत्यधिकम् क. ई. 9. प्राप्नोति क. 10–11. सोमो नास्ति क. ब. ह. 12. वाक्यमिदं नास्ति क. ब. ह.